ङः ।) गुल्फोर्द्ध्वजान्वधोभागः । जाङ् इति भाषा ॥ तत्पर्य्यायः । प्रसृता २ । इत्यमरः ॥ टङ्का ३ टङ्कम् ४ टङ्किका ५ । इति शब्दरत्नावली ॥ ( यथा, महाभारते । ५ । १३३ । १६ ।

"शत्रुर्निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता ॥")

जङ्घाकरिकः, पुं, ( जङ्घा तत्साध्यगतिरेव आकरो निधिः जीविकानिर्व्वाहधनस्येत्यर्थः । सोऽस्यास्तीति । जङ्घाकर+"अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) धावकः । तत्पर्य्यायः । जाङ्घिकः२ । इत्यमरः । २ । ८ । ७३ ॥ डाकचक्री ३ । इति शब्दरत्नावली ॥

जङ्घात्राणं, क्ली, ( त्रायतेऽनेनेति । त्रै+करणे ल्युट् । त्राणं वर्म्म । ततो जङ्घायास्त्राणमिति । ) जङ्घासन्नाहः । तत्पर्य्यायः । मङ्खुणम् २ । इति त्रिकाण्डशेषः ॥

जङ्घालः, त्रि, ( प्रशस्ता वेगवतीत्यर्थः जङ्घास्यास्तीति । जङ्घा+"सिध्मादिभ्यश्च ।"५।२।९७। इति लच् । जङ्घाबलेनैव वेगस्य जननात्तथात्वम् ।) अतिवेगवान् । तत्पर्य्यायः । अविजवः२ । इत्यमरः । २ । ८ । ७३ ॥ ( यथा, काशीखण्डे गङ्गामाहात्म्ये । २९ । ६४ ।

"जाह्नवीज्या जगन्माता जप्या जङ्घाल-
वीचिका ॥" )

हरिणः । एणः । कुरङ्गः । ऋष्यः । पृषतः । न्यङ्कुः । शम्बरः । राजीवः । मुण्डी । ( यथा,—

"एणहरिणर्क्ष्यकुरङ्गकरालकृतमालशरभ-
श्वदंष्ट्रापृषतचारुष्करम्बगमातृकाप्रभृतयो
जङ्घाला मृगाः कषाया मधुरा लघवो वातपित्त-
हरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च ॥" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

एषां मांसगुणाः ।

"जङ्घालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥"
इति भावप्रकाशः ॥

जङ्घाशूलं, क्ली, ( जङ्घायाः शूलं रोगविशेषः । ) जङ्घावेदना । तस्यौषधं यथा,—

"हरीतकी शृङ्गवेरं देवदारु च चन्दनम् ।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम् ॥
जङ्घाशूलमुरस्तम्भं सप्तरात्रे तु नाशयेत् ॥"
इति गारुडे १८७ अध्यायः ॥

जज, युधि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) जजति । युधि योधने । इति दुर्गादासः ॥

जजि, इ युधि । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) इ, जञ्जति । युधि योधने । इति दुर्गादासः ।

जञ्जपूकः, त्रि, (पुनःपुनरतिशयेन वा जपतीति । जप+यङ्+"यजजपदशां यङः ।"३ ।२।१६६। इति ऊकः ।) पुनःपुनर्जपकर्त्ता । इति मुग्धबोधम् ॥

जट, संहतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) जटति केशः परस्परं लग्नः स्यादित्यर्थः । इति दुर्गादासः ॥

जटा, स्त्री, ( जटति परस्परं संलग्ना भवतीति । जट्+अच् । यद्वा, जायते प्रादुर्भवतीति । जन्+"जनेष्टन् लोपश्च ।" उणां । ५ । ३० । इति टन् अन्त्यलोपश्च ।) व्रतिनां शिखा । लग्नकचः । तत्पर्य्यायः । सटा २ । इत्यमरः ॥ जटिः३ जटी४ जूटः५ जुटकम्६ शटम्७ कोटीरम् ८ जूटकम् ९ हस्तम् १० । इति शब्दरत्नावली ॥ (यथा, महाभारते ।३।११२।२।

"नीलाः प्रसन्नाश्च जटाः सुगन्धा
हिरण्यरज्जुग्रथिताः सुदीर्घाः ॥")

मूलम् । यथा,—

"यदि न समुद्धरन्ति यतयो हृदि कामजटा
दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणिः ॥"
इति श्रीभागवते श्रुतिस्तवे ८७ अध्यायः ॥

मांसी । इति मेदिनी । टे, १५ ॥ रुद्रजटा । ( यथा, सुश्रुते कल्पस्थाने ७ अध्याये ।

"कालेयकं पद्मकञ्च मधुकं नागरं जटाम् ॥")

शतावरी । इति राजनिर्घण्टः ॥ कपिकच्छुः । इति रत्नमाला ॥ ( वेदपाठविशेषः । यथा,—

"जटा माला शिखा लेखा ध्वजो दण्डो रथो
घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्व्वं महर्षिभिः ॥")

जटाजूटः, पुं, ( जटानां जूटः समूहः । ) जटासमूहः । यथा, महानाटके ।

"जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥"

शिवजटा च ॥

जटाज्वालः, पुं, (जटेव ज्वाला यस्य ।) प्रदीपः । इति हारावली । २४ ॥

जटाटङ्कः, पुं, ( जटा टङ्क इवास्य ।) शिवः । इति त्रिकाण्डशेषः ॥

जटाटीरः, पुं, ( जटामटतीति । अट्+बाहुलकादीरन् ।) शिवः । इति त्रिकाण्डशेषः ॥

जटाधरः, पुं, ( धरतीति । धृ+अच् । जटाया धरः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १७ । १२६ ।

"त्रिनेत्रश्च विषसाङ्गो मणिविद्धो जटाधरः ॥")

बुद्धभेदः । इति त्रिकाण्डशेषः ॥ पर्य्यायनानार्थकोषाख्याभिधानतन्त्रकारश्च ॥ ( स्कन्दस्यानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ५९ ।

"परिस्रुतः कोकनदः कृष्णकेशो जटाधरः ॥"

देशविशेषः । स तु दाक्षिणात्यप्रदेशः । यथा, बृहत्संहितायाम् । १४ । १३ ।

"अथ दक्षिणेन ।" इत्युक्त्वा,—

"क्रौञ्चद्वीपजटाधरकावेर्य्यो रिष्यमूकश्च ॥"
इत्युक्तवान् ॥

जटाधारिणि, त्रि । यथा, रामायणे।२।८६।२५।

"जटाधरौ तौ द्रुमचीरवाससौ
महाबलौ कुञ्जरयूथपोपमौ ॥")

जटामांसी, स्त्री, ( जटां जटाकृतिं मन्यते इति । मन+"मनेर्दीर्घश्च ।" उणां ।३ । ६४। इति सो दीर्घश्च ।) सुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । नलदम् २ वह्निनी३ पेषी ४ मांसी५ कृष्णजटा६ जटी ७ किरातिनी ८ जटिला ९ लोमशा १० तपस्विनी ११ । इति रत्नमाला ॥ भूतजटा १२ । इति भावप्रकाशः ॥ पेशी १३ क्रव्यादि १४ पिशिता १५ पिशी १६ पेशिनी १७ जटा १८ हिंस्रा १९ मांसिनी २० जटाला २१ नलदा २२ मेषी २३ तामसी २४ चक्रवर्त्तिनी २५ माता २६ अमृतजटा २७ जननी २८ जटावती २९ मृगभक्ष्या ३० जडामांसी ३१ मिंसी ३२ मिषिः ३३ मिसी ३४ मिषिका ३५ मिषिः ३६ । इति शब्दरत्नावली ॥ अस्या गुणाः । सुरभित्वम् । कषायत्वम् । कटुत्वम् । शीतलत्वम् । कफभूतदाहपित्तनाशित्वम् । कान्तिमोदकारित्वञ्च । इति राजनिर्घण्टः ॥ तिक्तत्वम् । मेध्यत्वम् । बलप्रदत्वम् । स्वादुत्वम् । त्रिदोषास्रवीसर्पकुष्ठनाशित्वञ्च । इति भावप्रकाशः ॥ अनुलेपनेन ज्वरदाहघ्नतानाशित्वम् । इति राजवल्लभः ॥

जटायुः, पुं, (जटां याति प्राप्नोतीति । या+मृगय्वादित्वात् कुः । सान्तपक्षे जटं संहतमायुर्यस्य ।) स्वनामख्यातपक्षी । स तु अरुणपुत्त्रः सम्पातेरनुजः दशरथराजसखः सीताहरणसमये रावणेन हतः । इति रामायणम् ॥ ( यथा, च महाभारते । ३ । २७८ । १—७ ।

"सखा दशरथस्यासीत् जटायुररुणात्मजः ।
गृध्रराजो महावीरः सम्पातिर्यस्य सोदरः ॥
स ददर्श तदा सीतां रावणाङ्कगतां स्नुषाम् ।
सक्रोधोऽभ्यद्रवत् पक्षी रावणं राक्षसेश्वरम् ॥
अथैनमब्रवीद्गृध्रो मुञ्च मुञ्चस्व मैथिलीम् ।
ध्रियमाणे मयि कथं हरिष्यसि निशाचर ! ॥
नहि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे वधूम् ।
उक्त्वैवं राक्षसेन्द्रं तं चकर्त्त नखरैर्भृशम् ॥"
"स वध्यमानो गृध्रेण रामप्रियहितैषिणा ।
खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिणः ॥
निहत्य गृध्रराजं स भिन्नाभ्रशिखरोपमम् ।
ऊर्द्ध्वमाचक्रमे सीतां गृहीत्वाङ्केन राक्षसः ॥")

गुग्गुलु । इति मेदिनी । ये, ८४ ॥

("गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।
कुम्भोलूखलकं क्लीवे महिषाक्षः पलङ्कषः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"जटायुः कालनिर्य्यासः कौशिको गुग्गुलुः पुरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

सान्तोऽप्ययम् । इति द्विरूपकोषः ॥ ( यथा, महाभारते । १ । ६६ । ७० ।

"अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महाबलौ ।
सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम् ॥")

जटालः, पुं, ( जटास्यस्येति । जटा+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् । ) कर्च्चूरः । वटः । मुष्ककः । गुग्गुलुः । इति राजनिर्घण्टः । जटायुक्ते, त्रि । इति शब्दरत्नावली ॥ ( यथा, हरिवंशे । १८० । २२ ।

"चीरिणः शिखिनश्चान्ये जटालोर्द्ध्वशिरोरुहाः ॥")